International Journal of Sanskrit Research 2021; 7(1): 145-147

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 145-147
© 2021 IJSR
www.anantaajournal.com
Received: 05-11-2020
Accepted: 15-12-2020

**डॉ0 कुलदीप चन्द्र पन्त**
विषय–संस्कृत, विभाग–संस्कृत (शिक्षा विभाग), पद–सहायक प्रवक्ता (साहित्य), जयभारत साधु महाविद्यालय, हरिद्वार विश्वविद्यालय–उत्तराखंड संस्कृत विश्वविद्यालय, बहादराबाद, हरिद्वार, उत्तराखण्ड, भारत

**Corresponding Author:**
**डॉ0 कुलदीप चन्द्र पन्त**
विषय–संस्कृत, विभाग–संस्कृत (शिक्षा विभाग), पद–सहायक प्रवक्ता (साहित्य), जयभारत साधु महाविद्यालय, हरिद्वार विश्वविद्यालय–उत्तराखंड संस्कृत विश्वविद्यालय, बहादराबाद, हरिद्वार, उत्तराखण्ड, भारत

# पुराणेषु दार्शनिकं चिन्तनम्

**डॉ0 कुलदीप चन्द्र पन्त**

**प्रस्तावना**

निखिलसंस्कृतवाङ्मये लौकिकसंस्कृतसाहित्ये पुराणानां स्थानमन्यतं कल्पितं बुधैः ।वेदब्राह्मणारण्यकोपनिषत्पुराणादिभिः संस्कृसाहित्यं मण्डितं वर्तते। तत्र पुराणानि भारतीयसंस्कृतेराधारभूतानि व्यावहारिकशास्त्राणि सन्ति सर्वप्रथमं पुराण शब्दस्य निष्पत्तिः शाब्दिकैः प्रतिपाद्यते। तत्र व्याकरणग्रन्थेषु 'पुराणम्' अर्थात् पुराभवम् इत्यस्मिन्नर्थे सायंचिरं–''प्राह्णेपगव्येभ्यष्टयुटयुलौ तुट् च''[1] अनेन सूत्रोण पुरा शब्दात् ट्यु प्रत्यये सति तुडागमनेन पुरातनमिति शब्दः निष्पद्यते। पुनः यास्करचित निरूक्तारूव्ये ग्रन्थे पुराणस्यार्थः ''पुरा नवं भवति''[2] इति विद्यते। पुराणानि अष्टादश इति तु सुविदितमेव तद्यथा–

अष्टादश पुराणेष व्यासस्य वचनद्वयम्।
परोपकाराय पुण्याय पापाय परपीडनम्।।

प्रायेण सर्वेषु पुराणेषु पुराणशब्दस्योल्लेखः प्रयोजनं महत्वं च बहुधा वर्णितोऽस्ति। दिङ्गमात्रं यथा–

(1) यस्मात् पुरा ह्यनक्तीदं पुराणं तेन तत् स्मृतम्।
निरूक्तमस्य यो वेद सर्वप्रायैः प्रमुच्यते [3]
(2) पुर परम्परा वष्टि पुराणं तेन तत् स्मृतम [4]

पुराणान्यतिरिच्य वैदिकसाहित्ये संहिताब्राह्मणोपनिषत्स्वपि अस्य शब्दस्य विविधर्थेषु प्रयोगः दृश्यते अथर्ववेद यथा–

''ऋचः सामानि छन्दांसि पुराणं यजुषा सह'' [5]

ब्राह्मणसाहित्ये गोपथ ब्राह्मणे एकस्मिन् मन्त्रे वेदपंचकानामुल्लेखो वर्तते। तत्र पुराणवेदस्योल्लेख प्राप्यते–

''एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणः, सोपनिषत्काः सेतिहासाः सान्वाख्याताः सपुराणाः।''[6]

एवमन्यत्रापि।
पुराणेषु विविधाः विषयाः वर्णिताः सन्ति। पुराणानि न केवलं भारतीयसंस्कृतेः आधरभूतानि अपितुः तत्र सकल विश्वाय संस्कृतेदर्शनं भवति। तत्रा धर्म–नीति–कर्म, ज्ञान, भक्ति, योग, आयुर्वेद, पर्यावरण, तीर्थानि, दर्शनानि, आदयः नैकाः चतुर्विधपुरूषार्थ साधकाः सप्रयोजनकाः विषयाः सविस्तरेण वेदव्यासमुनिना प्रतिपादिताः।
पुराणेषु चरित्र वर्णन प्रसङ्गेन मध्ये–मध्ये वेदान्तवेद्यानि परमसूक्ष्माणि तत्वानि विविधदृष्टान्तैः सरलानि विधयनापाख्यानैश्च सम्भूष्य स्थूलमतीनामपि सुविज्ञेयानि कृतानि। पुराणेषु दार्शनिकचिन्तनं यदि परिशील्यते चेत् अष्टादशपुराणेषु,
श्रीमद्भागवतमहापुराणे तु नैकेषु प्रसङ्गेषु द्रष्टुं शक्यते। यथा परब्रह्मणो अतर्क्यशक्तिमत्वम्, अनन्तत्वं व्यापकत्वम्, परामान्दरूपत्वं चोपनिष्प्रतिपादितं यथैवास्ते तत्तथैव भगवतः श्रीकृष्णस्य, श्रीरामचन्द्रस्य वा परब्रह्मरूपत्वं स्वीकृत्य पुराणेषु प्रदर्शितम्। यथा हि श्रीमद्भागवतमहापुराणे–

'निशीथेतम उद्‌भूते जायमाने जनार्दने
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः।। [7]
अहो भाग्यमहो भाग्यं नन्दगोपव्रजोकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्मसनातनम्।। [8]

ब्रह्मणोऽतर्क्य शक्तिमत्त्वं भागवते एवं नन्दगोपकुमारस्य श्रीकृष्णस्य चरित्रे यशोदायाः प्रस्तुतं स्तनं पायन्त्या जृम्भतः कृष्णस्य मुखे विचित्रां विश्वं पश्यन्त्या वर्णनप्रसङ्गे श्रीव्यासदेवेन दर्शितम्। तत्र यथा–

एकदार्भकमादाय स्वाङ्कमारोप्य भामिनी।
प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता। ।
प्रीतप्रायस्य जननी सा तस्य रूचिरस्मितम्।
मुखं लालयती राजन् जृम्भतो ददृशे इदम्।।
खं रोदसी ज्योतिरनीकमाशाः, सूर्येन्दुवह्निश्वसनाम्बुधींश्च।
द्वीपान् नगांस्तद्दुहितृर्वनानि, भूतानि यानि स्थिरजघ्गमानि।। [9]

अनन्तशक्तिमत्वं च परब्रह्मणः कृतहैयङ्गवीनचौर्यस्य यशोदाकृतानेकदामबन्ध्नेऽपि अबद्धस्य द्वयङ्गुलोनस्य श्रीकृष्णस्य वर्णन प्रसङ्गे प्रकाशितम्। दशमे स्कन्धे एव यथा–

'इयेष किल तं बद्धं दाम्नाऽतद्वीर्यकोविदा
न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरमम्।।
द्वयङ्गुलोनमभूत्तेन सन्दधेऽन्यच्च गोपिका।
यदासीतदपि न्यूनं तेनान्यदपि सन्दधे।। [10]

उपाधिना तथानेकरूपत्वं ब्रह्मणो भौमासुरकारागृहबद्धषोडशसहस्रकन्याभिः साकमेकस्मिन मुहूर्ते अनेकेषु तावन्ति रूपाणि विधाय श्रीकृष्णेन विवाहः कृत इति वर्णनेन, तथा गोकुले वत्सादीन् हृतवतो ब्रह्मणो वर्णनप्रसङ्गेन प्रकटीकृतम–

अथो मुहूर्ते एकस्मिन् नानागारेषु ता स्त्रियः।
यथोपयेमे भगवाँस्तावद्रूपधरोऽव्ययः।। [11]

परब्रह्मणो दयालुत्वादिकमनेकशक्तिशालित्वं च श्रीकृष्णस्य गोवर्धन धरणादिकार्यसम्पादनवर्णनेन निरूपितम्। एवं परमानन्दरूपत्वं श्रीकृष्णकृतानेकक्रीडने गोकुले जातानन्दस्वरूपवर्णनेन बोधितम्। दशमस्कन्धे यथा–

गोप्यः किमाचरदयमं कुशलं स्मवेणु –
र्दामोदराधरसुधामपिगोपिकानाम्।
भुङ्क्ते स्वयं यदवशिष्टरसंह्रदिन्यो हृष्यत्वचोऽश्रु मुमुचुस्तरवो यथार्याः।। [12]

तथा च अन्यानेनकदर्शनवत् पुराणेष्वपि विवर्त्तवादः, परिणामवादः, मूलभूततत्वस्यैकरूपत्वम्, अनेकरूपत्वम् शक्तिशक्तिमतोऽभिन्नरूपत्वम्, जगतः विष्णवादिरूपत्वम्, परब्रह्मणो विवर्तरूपतवम्, जगदादिकारणस्य विष्णुशिवनृसिंहादिरूपेण वर्णनम्, विष्णवादिश्चेतराणां समुत्पत्यादिकं चोपलभ्यते। तद्यथा–विवर्तवाददर्शनं विष्णुपुराणे–

ज्ञानस्वरूपत्वमत्यन्तनिर्मलं परमार्थतः।
तमोवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ।। [13]

परिणामवाददर्शनम् यथा–

विष्णोः सकाशातदुद्‌भूतं जगदत्रैव च स्थितम्।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः।। [14]

एवमन्यत्रापि दार्शनिकतत्वानां प्रतिपादनं विद्यते। पुनः मत्स्यपुराणे परमदयालुभिर्व्यासादिभिर्यम–नियमादिद्वारा समाधियुक्तेन विशुद्धचेतसा प्रत्यक्षाद्यगम्यस्य सर्वथालौकिकस्य तत्वस्य दर्शनं विधाय अन्येषाम् ''अल्पज्ञानां बोधनार्थं तर्कस्याप्याश्रयणं कृतम्।''[15] पुराणेषु स्वीयप्रकारविशेषपद्धत्या सर्वदर्शनप्रतिपादित तत्वसमन्वयः कृतो दृश्यते। यथा प्रकृते सकाशात् महदादीनि तन्मात्रान्तानि सप्त तत्वानि प्रादुर्भूय सम्पूर्णं जददुत्पादयन्ति इति सांख्यशास्त्रे प्रतिपादितम्, तथा स एव क्रमः पुराणेषु स्वतत्वप्रतिपादनद्वारा प्रतिपादितः। तथा हि ब्रह्मशब्दवाच्यप्रकृतेः सकाशादुत्पन्नाः कश्यपादयो मानसपुत्राः सप्त सर्वं भूतजातमुत्पादयन्ति। क्वचिन्महत्तत्वस्यैव ब्रह्मनामेति प्रत्यपादि तथैव सत्वादिगुणानां विष्णवादिसंज्ञा सन्तीति निरूपितम्।

बृहत्वाद् बृंहणात्वाच्च भावनां सलिनाश्रयात्।
यस्मात् बृंहयते भावान् ब्रह्मा तेन निरूप्यते।। [16]
रजो ब्रह्मा तमो ह्याग्निःसत्वं विष्णुतजायत।
परम्पराश्रिता ह्येते परम्परमनुव्रताः।। [17]

प्रायः मनुष्याणां मनसि कुतोऽहं समायातः? सर्वदा विपरिणामशीलस्य जगतः मुलभूतं किंचिद् अविपरिणामि नित्यं सर्वदैकमरूपेण स्थितं तत्वमुपलभ्यते, न वा? सर्वथा दुर्निवारस्य मृत्योः कथं निवृत्तिः भवेत्? मनुष्ये हि सुखाय कृतं कर्मापि दुःखायैव सम्पद्यते, अस्य कारणं किम्? इत्यादयोः बहवो विचाराः प्रादुर्भवन्ति। एतेषां समाधनाय यमनियमाद्याचरणशीलैः रागलोभादि शून्यैः सदा– चाररतैः प्राचीनर्षिभिः कृता विचाराः एव दार्शनिकतत्वरूपेण प्रादूर्भवन्ति। तद्यथा–

तितिक्षवः कारूणिकाः सुहृदः सर्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः।।
मदाश्रयाः कथा मृष्टाः श्रृण्वन्ति कथयन्ति च।
तपन्ति विविधस्तापानेकतान्मद्‌गतचेतसः।। [18]

ततो विचारे सूक्ष्मतमे प्रवृत्ते प्रत्यक्षप्रमाणगम्येऽर्थे प्रत्यक्षप्रमाणे च आस्थाभावात् मनुष्योपलब्ध्स्य सम्पुर्णस्यगमापायिनो जगत आधरभूतं किंचिद् सनातनं नित्यमेकरूपमखण्डं तत्वं विद्यते न वेति विचिकित्सते। इति पुराणतो मुमुक्षोः विचित्सकस्य विचारः समुपलभ्यते।
अथ अधुना भागवते सुखदुःखकारण जीव–आत्मा, ईश्वर–ब्रह्म माया–जगत परमपुरूषार्थ– पुरूषार्थसाध्नविषये उपलब्ध्यः प्रस्तूयन्ते।

1. जीवः– पूर्वजन्मकृतकर्मानुरूपं वर्त्तमानजन्मनि सम्पादितसात्विकादिगुणः कदाचिद् पुमान्, स्त्री, पशु, पक्षी, अन्यद् वा भवति। अर्थात् जीवो नामाज्ञानयुतः पुर्वकर्मवासनानुरूपसुखदुःखनुभवसाधनं पांचभौतिकदेहयुतश्चेतनः परमेश्वरांशो वा।

यथा श्रीमद्भागवते–

क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः।
देवोमनुष्यस्तिर्यग्वा यथा कर्मगुणः भवः।। [19]
एकस्यैव ममांशस्य जीवस्यैव महामते।
बन्धेस्यविधयानादिर्विद्यया च तथेतरः।। [20]

2. आत्मा–एको ज्योतिरूपो नित्यो देहादिभ्यो भिन्नः निर्गुणश्चापि स्वोत्पन्नगुणद्वारा निर्मितदेवमनुष्यादिरूपोपाध्नि अनेकरूपः प्रतीयते देहरूपात्मभ्यः परः सुषुप्तेः साक्षी च।
3. ब्रह्म–सर्वस्य जगतः स्थितिरुत्पत्तिविनाशनां कारणं स्वतोऽकारणं जग्रदाद्यवस्थानां समाधि सहितामनुस्यूतंदेहेन्द्रियादिभिः यद्‌गम्यं तद्वास्तविकं नास्तीति निषेधाधारभूतं यत्तदेव ब्रह्म।

4. ईश्वरः– वेदादिकानामादिद्रष्टा तदनुरूपं सर्वेषां प्राण्यादीनां स्वप्रचालितनियमद्वारा संचालकाः।
5. माया– अर्थं बिनापि असतो वस्तुना भासिका परमेश्वरस्यशिक्तिविशेषो माया। यथा स्वपने पुरूष स्वशिरच्छेदनादिकं पश्यति, तथैवात्मनो बन्धमोक्षाद्यसन्नपि यया अनुभवति पुरूषः सेश्वरस्य शक्तिर्माया।

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मानो मायां यथाऽऽभासो यथा तमः।। [21]

6. सुखदुःखयो कारणम्– मनुष्याः परमकल्याणं अजानन्तो विषयभोगेच्छया परस्परं वैरमुत्पाद्य अल्पसुखस्य हेतो पर्वतप्रायदुःखमनुभूय दुखस्य कारणं जिज्ञासन्तेः परन्तु सम्यक्तया न जानन्ति। परन्तु अनेकाः कल्पनाः कुर्वन्तः सुखदुःखकारणविषये विवदन्ते। केचन, कर्म, केचित् स्वभावम्, एके परमेश्वरं च निरूपयन्ति

यथाहि–

केचिद् विकल्पवसना आहुरात्मानमात्मनः।
दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ।। [22]

एवं पुराणेषु दार्शनिक तत्वानां विवेचन अनेकत्रा समुपलभ्यते। तथा भगवन्तं प्रति समर्पणमेव जीवानां श्रेयमार्गः। साधकानां देहेन्द्रियः यदि तस्य परमेश्वरस्याराधनाय नियोजयेत् तर्हि निश्चयतमं तेषां कल्याणम्। पौराणिक दार्शनिक सिद्धान्तानां पर्यवसानमत्रैव इति । सत्यम्–शिवम्–सुन्दरम्।।

**सन्दर्भ सूची**


1. पाणिनि अष्टा0– 4.3.23
2. यास्क रचित निरूक्त– 3.19
3. वायु पु0– 1.203
4. पदम् पु0– 5.2.53
5. अथर्व वेद– 21.7.5
6. गोपथ ब्राह्म0पू0भा0– 2.10
7. (10.3.9 भागवत पु0)
8. श्रीमद्भागवत महापुराण– 20.14.32
9. श्री0भाग0– 10.7.34–36
10. श्रीमद.भाग0– 10.912–16
11. श्रीमद्भागवत– 10.59.42
12. श्रीमद्भागवत– 10.21.9
13. विष्णु पु0– 1.2.6
14. विष्णु पु– 1.1.35
15. मत्स्य0 पु0– 113.4–5
16. वायु0 पु0– 1.4.29
17. वायु0 पु0– 1.5.11
18. श्रीमद्भागवत– 3.25,21–23
19. श्रीमद्भागवत– 4.29.29,32
20. श्रीमद्भागवत– 12.11.4
21. श्रीमद्भागवत– 2.9.33
22. श्रीमद्भागवत– 5.5.16